# വൈഭവം 2021
# ഡയറ്റ് & പൊതുവിദ്യാഭ്യാസവകുപ്പ്, എറണാകുളം

दशमी कक्षा

## संस्कृतम्

**T 11** पूर्णाङ्काः - 20

**I. अधोदत्तानां प्रश्नानाम् उत्तरं कोष्ठकात् निर्धार्य लिखत।** **8 x 1 = 8**

1. अधोदत्तेषु फलपाकान्तं सस्यं किम्?
   (कदली, पनसः, द्राक्षा)
2. धिक् शब्दयोगे का विभक्तिः?
   (प्रथमा, द्वितीया, तृतीया)
3. बलीवर्दः इति पदस्य समानार्थकं पदं किम्?
   (अश्वः, वृषभः, वानरः)
4. अभिज्ञानशाकुन्तलस्य मुख्यरसः कः?
   (हास्यरसः, करुणरसः, शृङ्गाररसः)
5. वृक्षायुर्वेदः केन विरचितः?
   (सोमदेवेन, सुरपालेन, भरद्वाजेन)
6. यमनचिकेतसोः संवादः कुत्र अन्तर्भवति?
   (मुण्डकोपनिषदि, कठोपनिषदि, केनोपनिषदि)
7. लाभानां श्रेष्ठं किम्?
   (दाक्षयम्, आरोग्यम्, श्रुतम्)
8. अधोदत्तेषु चेदिराजः कः?
   (दिलीपः, दुष्यन्तः, शिशुपालः)

**II. यथोचितं योजयत।** **4 x 1 = 4**

धेनोः माता - वनस्पतिः
दशपुत्रसमः - ब्रह्मचारी
पनसः - सुरभिः
वटुः - द्रुमः

**III. उदाहरणानुसारं पदच्छेदं लिखत।** **1 x 1 = 1**

उदाः- भक्तिरिव - भक्तिः + इव

बुद्धिरिव ________ + ________

**IV. अधोदत्तवाक्यात् संबोधनपदं चित्वा लिखत। 1 x 1 = 1**

गच्छ वत्से! सर्वं भद्रं जायेत।

**V. उदाहरणानुसारम् एकपदं लिखत। 1 x 1 = 1**

महान् चासौ ऋषिः च - महर्षिः।

देवः च असौ ऋषिः च - ———

**VI. 6-10 प्रश्नेभ्यः चतुर्णाम् उत्तराणि लिखत। 2 x 4 = 8**

6. अधोदत्तवाक्यात् शत्रन्तं शानजन्तं च विविच्य लिखत।

"कृषकः तं दुर्बलं वृषभं तोदनेन ताडयन् नुद्यमानः अवर्तत"।

7. उदाहरणानुसारं वाक्यं परिवर्त्य लिखत।

उदाः- भोजनशालायाम् अन्नं नास्ति। अन्यत् सर्वम् अस्ति।

भोजनशालायाम् अन्नात् ऋते अन्यत् सर्वम् अस्ति।

(क) ग्रन्थशालायां रामायणं नास्ति। अन्यत् सर्वम् अस्ति।

8. पट्टिकां पूरयत।

| लट् | लङ् | लोट् |
|---|---|---|
| ——— | अगच्छत् | गच्छतु |
| वदति | ——— | वदतु |

9. अधोदत्तं वाक्यं पठित्वा क्त्वान्त - तुमुन्नन्त- पदे चित्वा लिखत-

षट्कालेषु गातुं गोविन्दमारार् महाभागस्य वैभवं पुरतो दृष्ट्वा सः विस्मितः अभवत्।

10. शङ्करः दारिद्र्यनिवृत्तये ऐश्वर्यदेवताम् उपासितवान् इत्याशययुक्तम् श्लोकं चित्वा लिखत।

(क) स मुनिर्मुरभित्कुटुम्बिनीं
पदचित्रैर्नवनीतकोमलैः।
मधुरैरुपतस्थिवास्तवै
र्द्विजदारिद्र्यदशानिवृत्तये।।

(ख) अमुना वचनेन तोषिता
कमला तद्भवनं समन्ततः।
कनकामलकैरपूरय-
ज्जनताया हृदयं च विस्मयैः।।

**VII. प्रश्नेषु त्रयाणाम् उत्तरं लिखत।** **3 x 2 = 6**

11. नाम - भीमराव् राम्जी अम्बेद्कर्

    जन्म - 14 अप्रैल् 1892

    पितरौ - राम्जी सम्पालः, भीमाबायी च

    प्रशस्तिः - भरणघटनाशिल्पी।

    पुरस्कारः - भारतरत्नम्।

12. अधोदत्तां खण्डिकां पठित्वा प्रश्नानाम् उत्तराणि लिखत।

    प्रसिद्धसंस्कृतनाटकेषु अन्यतमं भवति शूद्रकस्य मृच्छकटिकम्। नाटकेfस्मिन् चारुदत्तवसन्तसेनयोः अनुपमप्रणयकथायाः सुन्दरं दृश्यं द्रष्टुम् शक्यते। अत्र शृङ्गारः मुख्यरसः भवति। शूद्कस्य शैली अतीव सरला दीर्घसमासरहिता च भवति।

1. मृच्छकटिकं नाम नाटकस्य कर्ता कः?
2. कयोः प्रणयकथा नाटकेfस्मिन् वर्ण्यते?
3. अधोरेखाङ्कितस्य पदच्छेदं कुरुत।
4. नाटकस्य मुख्यरसः कः?

13. अधोदत्तेषु वेदवेदाङ्गानि उपनिषदः च पट्टिकरुपेण विविच्य लिखत।

    (ऋक्, कठम्, निरुक्तम्, सामः, छन्दः, माण्डूक्यम्, शिक्षा, यजुः, व्याकरणम्, अथर्वः, ईशम्, तैत्तिरीयम्)

14. मञ्जूषातः पदानि स्वीकृत्य पट्टिकां पूरयत।

    इक्षुः, आम्रः, कर्कटी,
    नालिकेरः, कदली, अश्वत्थः

| वृक्षः | वनस्पतिः | वीरुत् | ओषधिः |
|---|---|---|---|
| | | | |

**VIII.** प्रादेशिकभाषया लिखत **5**

कैरलीचलनचित्रेषु संस्कृतगानानाम् अपि महत्वरं स्थानं भवति। तेषु प्रसिद्धम् अस्ति "जानकीजाने..." इति संस्कृतगानम्। गानमिदं प्रसिद्धकविना यूसफलि केच्चेरि महाशयेन विरचितमस्ति। सर्वे जनाः कैरलीगानमिव संस्कृतगानमपि स्वीकुर्वन्ति। अतः इदानीम् अनेकानि संस्कृतगानानि चलनचित्रेषु प्रचलन्ति।